"अनूढ़ानङ्गपीड़ेव ममेयं मानसी यथा ॥"
इति प्राच: ॥
मानसतापो यथा,—
"कामक्रोधभयद्वेषलोभमोहविषादज: ।
शोकासूयावमानेर्ष्या मात्सर्य्यादिभयन्तथा ॥
मानसोऽपि द्विजश्रेष्ठ ! तापो भवति नैकधा ॥"
इति विष्णुपुराणे ६ अंशे ५ अध्याय: ॥
त्रिविधमानसकर्म्म । यथा,—
"परद्रव्येष्वभिध्यानं मनसानिष्टचिन्तनम् ।
वितथाभिनिवेशश्च त्रिविधं कर्म्म मानसम् ॥"
इति तिथ्यादितत्त्वम् ॥
मानसरोगा यथा,—
कामक्रोधलोभमोहभयाभिमानदैन्यपैशुन्य-
विषादेर्ष्यासूयामात्सर्य्यप्रभृतय: । अथवा ।
उन्मादापस्मारमूर्च्छाभ्रमतम:संन्यासप्रभृतय: ।
इति भावप्रकाश: ॥*॥ ( मनसा सङ्कल्पेन कृत-
मित्यण् । ) सरोवरविशेष: । इति मेदिनी ।
से, ३१ ॥ स च कैलासे ब्रह्मणा निर्म्मित: ।
यथा,—
"कैलासश्चापि दुष्कम्पो दानवेन्द्रेण कम्पित: ।
यक्षराक्षसगन्धर्व्वैर्नित्यं सेवितकन्दर: ॥
श्रीमान्मनोहरश्चैव नित्यं पुष्पितपादप: ।
हैमपुष्करसंछन्नं तेन वैखानसं सर: ॥
कम्पितं मानसञ्चैव राजहंसनिषेवितम् ॥"
इति महाभारते हरिवंशे नारसिंहे २२८अ: ॥
अपि च ।
"कैलासपर्व्वते राम ! मनसा निर्म्मितं परम् ।
ब्रह्मणा नरशार्दूल ! तेनेदं मानसं सर: ॥
तस्मात् सुस्राव सरस: सायोध्यामुपगूहते ।
सर:प्रवृत्ता सरयू: पुण्या ब्रह्मसरश्च्युता ॥"
इति रामायणे आदिकाण्डे २४ सर्ग: ॥*॥
(पुं, नागविशेष: । यथा, महाभारते ।१।५७।१६।
"अमाहठ: कामठक: सुषेणो मानसो व्यय: ।"
शाल्मलीद्वीपस्य वर्षविशेष: । यथा, मात्स्ये ।
५३ । २३ ।
"श्वेतश्च हरितश्चैव जीमूतो रोहितस्तथा ।
वैद्युतो मानसश्चैव केतुमान् सप्तमस्तथा ॥"
पुष्करद्वीपस्थपर्व्वतविशेष: । यथा, मात्स्ये ।
"द्वीपार्द्धस्य परिच्छिन्न: पश्चिमे मानसो गिरि: ।")
मानसजप:, पुं, ( मानसेन कृतो जप: । ) धिया
वर्णश्रेण्युच्चारणम् । यथा,
"धिया यदक्षरश्रेण्या वर्णस्वरपदात्मिकाम् ।
उच्चरेदर्थमुद्दिश्य मानस: स जप: स्मृत: ॥
तज्जपे नियमो नास्त्येव । तथा च ।
"अशुचिर्वा शुचिर्वापि गच्छंस्तिष्ठन् स्वपन्नपि ।
मन्त्रैकशरणो विद्वान् मनसैव समभ्यसेत् ॥
न दोषो मानसे जाप्ये सर्व्वदेशेऽपि सर्व्वदा ॥"
इति तन्त्रसार: ॥
मानसतीर्थं, क्ली, ( मानसं तीर्थमिव । रागाद्य-
भावात् तथात्वम् । ) रागादिरहितं मन: ।
यथा,
सूत उवाच ।
"तीर्थानि कथितान्येवं भौमानि मुनिसत्तम ! ।
मानसानीह तीर्थानि फलदानि विशेषत: ॥
मनो निर्म्मलतीर्थं हि रागादिभिरनाविलम् ॥"
इति नारसिंहपुराणे ४६ अध्याय: ॥
मानसपूजा, स्त्री, ( मानसकृता पूजा । शाक-
पार्थिववत् समास: । ) मनोरचितद्रव्यकरणक-
सपर्य्या । यथा, हृत्पद्ममध्ये देवीं विभाव्य
कुण्डलीपात्रसंस्थेन सहस्रारामृतेन पाद्यं देव्या-
श्चरणे दद्यात् । ततो मनश्चार्घ्यं दत्त्वा सहस्र-
दलपद्मभृङ्गारलसितपरमामृतजलेन आचम-
नीयं मुखे । पञ्चविंशति तत्त्वेन गन्धञ्च ।
अहिंसां विज्ञानं क्षमां दयां अलोभं अमोहं
अमात्सर्य्यं अमायां अनहङ्कारं अरागं अद्वेषं
इन्द्रियाणि द्वादश एतानि पुष्पाणि च प्रदाप-
येत् । ततस्तेजोरूपं दीपं वायुरूपं धूपं दद्यात्
अम्बरं चामरं दर्पणं सूर्य्यं चन्द्रं छत्रं पद्मन्तु
मेखलां आनन्दं हारमुत्तमं अनाहतध्वनिमयीं
घण्टां निवेदयेत् । तत: सुधारसाम्बुधिं मांस-
पर्व्वतं ब्रह्माण्डपूरितं पायसञ्च दत्त्वा ।
"मनोनर्त्तनसत्तालै: शृङ्गारादिरसोद्भवै: ।
नृत्यैर्गीतैश्च वाद्यैश्च तोषयेत् परमेश्वरीम् ॥"
एवं संपूज्य अभेदेन जप: कार्य्य: । इति तन्त्र-
सारे त्रिपुराप्रकरणम् ॥ * ॥ मानसेगुरुपूजा
यथा, नीलतन्त्रे ।
"ततो मानसगन्धाद्यै: पूजयेत् स्वस्वहृद्गया ।
कनिष्ठा पृथिवीतत्त्वं तद्दयोगाद्गन्धयोजनम् ॥
अङ्गुष्ठो गगनं तत्त्वं तेनैव पुष्पयोजनम् ।
तर्ज्जनी वायुतत्त्वं स्याद्धूपं तेनैव योजयेत् ॥
अनामा जलतत्त्वं स्यात्तेनैव योजयेच्च कम् ।
ततस्तु वाग्भवं जप्यादष्टोत्तरशतं सुधी: ॥
जपं समर्प्य भक्त्या च प्रणमेद्दण्डवद्भुवि ॥"
अपि च ।
"मिथुनं चिन्तयित्वा तु मानसैरुपचारकै: ।
भौतिकै: पूजयेद्विद्वान् मुद्रामन्त्रसमन्वितै: ॥
भूम्याकाशमरुद्वह्निवारिमन्त्रै: सबिन्दुकै: ।
कनिष्ठाङ्गुलितर्ज्जन्यौ मध्यमानामिके तथा ॥
अङ्गुष्ठेन समायोगान्मुद्रा: पञ्च प्रकीर्त्तिता: ।
पृथिव्यात्मकगन्ध: स्यादाकाशात्मकपुष्पकम् ॥
धूपो वाय्वात्मक: प्रोक्तो दीपो वह्न्यात्मक: पर: ।
रसात्मकञ्च नैवेद्यं पूजा पञ्चोपचारिका ॥
ततस्तु वाग्भवं जप्यादष्टोत्तरशतं सुधी: ॥"
इत्यन्नदानकल्प: ॥
अन्यच्च ।
"मानसैरुपचारैश्च संपूज्य कल्पयेन्मुदा ।
गन्धं भूम्यात्मकं दद्याद्भावपुष्पं तत: परम् ॥
धूपं वाय्वात्मकं देयं तेजसा दीपमेव च ।
नैवेद्यममृतं दद्यात् पानीयं वरुणात्मकम् ॥
अम्बरं मुकुरं दद्याच्चामरं छत्रमेव च ।
तत्तन्मुद्राविधानेन संपूज्यात्मगुरुं जपेत् ॥
यथाशक्ति जपं कृत्वा समाप्य कवचं पठेत् ॥"
इति कङ्कालमालिनीतन्त्रम् ॥
पूजाक्रमस्तु । निजगुरुं ध्यात्वामुकानन्दनाथा-
मुकशक्त्याम्बाश्रीपादुकां पूजयामीति मानसै-
र्गन्धाद्यक्षतकुसुमैरर्च्चयेत् । कनिष्ठाभ्यां लं पृथि-
व्यात्मकं गन्धं समर्पयामि नम: । अङ्गुष्ठाभ्यां हं
आकाशात्मकं पुष्पं समर्पयामि नम: । तर्ज्ज-
नीभ्यां यं वाय्वात्मकं धूपं समर्पयामि नम: ।
मध्यमाभ्यां रं वह्न्यात्मकं दीपं समर्पयामि
नम: । अनामिकाभ्यां वं अमृतात्मकं नैवेद्यं
समर्पयामि नम: । इति कुलमूलावतारकल्प-
सूत्रटीकायां तृतीयकाण्डम् ॥
मानसव्रतं, क्ली, (मानसकृतं व्रतम् । शाकपार्थिव-
वत् समास: । ) अहिंसादि । यथा,—
"अहिंसा सत्यमस्तेयं ब्रह्मचर्य्यमकल्कता ।
एतानि मानसान्याहुर्व्रतानि तु धराधरे ॥"
इति वराहपुराणम् ॥
मानसालय:, पुं, (मानसे आलयो यस्य ।) हंस: ।
इति राजनिर्घण्ट: ॥
मानसिकं, त्रि, ( मानस + ठञ् । ) मनोभवम् ।
मानसशब्दात् ष्णिकप्रत्ययेन निष्पन्नम् ॥ (पुं,
विष्णु: । यथा, महाभारते । १२ । ३३८ ।४ ।
"नमस्ते देवदेवेश ! निष्क्रिय !
निर्गुण ! मानसिक ! नामगामिक ! ।")
मानसी, स्त्री, (मानस + स्त्रीत्वात् ङीप् ।) विद्या-
देवीविशेष: । इति हेमचन्द्र: ।२।१५॥ मनो-
भवा च ॥ ( यथा, विष्णुपुराणे । १ । ७ । १ ।
"ततोऽभिध्यायतस्तस्य जज्ञिरे मानसी: प्रजा: ॥")
मानसूत्रं, क्ली, ( मानस्य गात्रप्रमाणस्य तन्
मानार्थं वा सूत्रम् । ) स्वर्णादिनिर्म्मितकटि-
सूत्रम् । इति धनञ्जय: । गोट् इति भाषा ॥
मानसौका:, [स्] पुं, (मानसं सर ओको वासस्थानं
यस्य । ) हंस: । इत्यमर: । २ । ५ । २३ ।
(यथा, महाभारते । ८ । ४१ । १३ ।
"वयं हंसाश्चरामेमां पृथिवीं मानसौकस: ।")
मानिका, स्त्री, (मानयति गर्व्वीकरोतीति । मन +
णिच् + ण्वुल् टाप् अकारस्येत्वञ्च । ) मद्यम् ।
इति शब्दरत्नावली ॥ ( माने प्रभवतीति । मान
+ ठक् । ) शराव: । इति वैद्यकपरिभाषा ।
शेर इति भाषा ॥
मानिनी, स्त्री, फली वृक्ष: । इति मेदिनी । ने,
१०६॥ (मानं अस्त्यस्या: । मान + इनि: । ङीप् ।
मानवती च ॥ ( यथा, गीतगोविन्दे । ६ । २ ।
"हरिरभिसरति वहति मृदुपवने ।
किमपरमधिकसुखं सखि ! भवने ॥
माधवे माकुरु मानिनि ! मानमये ॥"
अभिमानवती च । यथा, कुमारे ।५।५३।
"इयं महेन्द्रप्रभृतीनधिश्रिय-
श्चतुर्दिगीशानवमत्य मानिनी ।
अरूपहार्य्यं मदनस्य निग्रहात्
पिनाकपाणिं पतिमाप्तुमिच्छति ॥"
"मानिनीन्द्राणीप्रभृतीरतिशय्य वर्त्तितव्यमित्यभि-
मानवती ।" इति तट्टीकायां मल्लिनाथ: ॥ )
राज्यवर्द्धनस्य पत्नी । यथा, मार्कण्डेये ।१०६।१०।